# shatrughnakavacham

# શત્રુઘ્નકવચમ્

## Document Information

Text title : shatrughnakavacham

File name : shatrughnakavachaAnanda.itx

Category : kavacha, raama, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Description-comments : from Anandaramayana

Latest update : January 30, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2021

*sanskritdocuments.org*

# શત્રુઘ્નકવચમ્

॥ શ્રીમદાનન્દરામાયણે મનોહરકાણ્ડાન્તર્ગતં શ્રીશત્રુઘ્નકવચમ્ ॥

અગસ્તિરુવાચ-
અથ શત્રુઘ્નકવચં સુતીક્ષ્ણ શ્રુણુ સાદરમ્ ।
સર્વકામપ્રદં રમ્યં રામસદ્ભક્તિવર્ધનમ્ ॥ ૧॥

શત્રુઘ્નં ધૃતકાર્મુકં ધૃતમહાતૂણીરબાણોત્તમં
પાર્શ્વે શ્રીરઘુનન્દનસ્ય વિનયાદ્વામેસ્થિતં સુન્દરમ્ ।
રામં સ્વીયકરેણ તાલદલજં ધૃત્વાતિચિત્રં વરં
સૂર્યાભં વ્યજનં સમાસ્થિતમહં તં વિજયન્તં ભજે ॥ ૨॥

અસ્ય શ્રીશત્રુઘ્નકવચમન્ત્રસ્ય અગસ્તિ ઋષિઃ । શ્રીશત્રુઘ્નો દેવતા ।
અનુષ્ટુપ્ છન્દઃ । સુદર્શન ઇતિ બીજમ્ । કૈકેયીનન્દન ઇતિ શક્તિઃ ।
શ્રીભરતાનુજ ઇતિ કીલકમ્ । ભરતમન્ત્રીત્યસ્ત્રમ્ ।
શ્રીરામદાસ ઇતિ કવચમ્ । લક્ષ્મણાંશજ ઇતિ મન્ત્રઃ ।
શ્રીશત્રુઘ્નપ્રીત્યર્થં સકલમનઃકામનાસિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

અથ અઙ્ગુળીન્યાસઃ ।
ૐ શત્રુઘ્નાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ સુદર્શનાય તર્જનીભ્યાં નમઃ ।
ૐ કૈકેયીનન્દનાય મધ્યમાભ્યાં નમઃ ।
ૐ ભરતાનુજાય અનામિકાભ્યાં નમઃ ।
ૐ ભરતમન્ત્રિણે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ શ્રીરામદાસાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિન્યાસઃ -
ૐ શત્રુઘ્નાય હૃદયાય નમઃ ।
ૐ સુદર્શનાય શિરસે સ્વાહા ।
ૐ કૈકેયીનન્દનાય શિખાયૈ વષટ્ ।

ૐ ભરતાનુજાય કવચાય હું ।
ૐ ભરતમન્ત્રિણે નેત્રત્રયાય વૌષટ્ ।
ૐ શ્રીરામદાસાય અસ્ત્રાય ફટ્ ।
ૐ લક્ષ્મણાંશજેતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ -
રામસ્ય સંસ્થિતં વામે પાર્શ્વે વિનયપૂર્વકમ્ ।
કૈકેયીનન્દનં સૌમ્યં મુકુટેનાતિરઞ્જિતમ્ ॥ ૧॥

રત્નકઙ્કણકેયૂરવનમાલાવિરાજિતમ્ ।
રશનાકુણ્ડલધરં રત્નહારસુનૂપુરમ્ ॥ ૨॥

વ્યજનેન વીજયન્તં જાનકીકાન્તમાદરાત્ ।
રામન્યસ્તેક્ષણં વીરં કૈકેયીતોષવર્ધનમ્ ॥ ૩॥

દ્વિભુજં કઞ્જનયનં દિવ્યપીતામ્બરાન્વિતમ્ ।
સુભુજં સુન્દરં મેઘશ્યામળં સુન્દરાનનમ્ ॥ ૪॥

રામવાક્યે દત્તકર્ણં રક્ષોઘ્નં ખડ્ગધારિણમ્ ।
ધનુર્બાણધરં શ્રેષ્ઠં ધૃતતૂણીરમુત્તમમ્ ॥ ૫॥

સભાયાં સંસ્થિતં રમ્યં કસ્તૂરીતિલકાઙ્કિતમ્ ।
મકુટસ્થાવતંસેન શોભિતં ચ સ્મિતાનનમ્ ॥ ૬॥

રવિવંશોદ્ભવં દિવ્યરૂપં દશરથાત્મજમ્ ।
મધુરાવાસિનં દેવં લવણાસુરમર્દનમ્ ॥ ૭॥

એવં ધ્યાત્વા તુ શત્રુઘ્નં રામપાદેક્ષણં હૃદિ ।
પઠનીયં વરં ચેદં કવચં તસ્ય પાવનમ્ ॥ ૮॥

અથ કવચપ્રારમ્ભઃ ।
પૂર્વે ત્વવતુ શત્રુઘ્નઃ પાતુ યામ્યે સુદર્શનઃ ।
કૈકેયીનન્દનઃ પાતુ પ્રતીચ્યાં સર્વદા મમ ॥ ૧॥

પાતૂદીચ્યાં રામબન્ધુઃ પાત્વધો ભરતાનુજઃ ।
રવિવંશોદ્ભવશ્ચોર્ધ્વં મધ્યે દશરથાત્મજઃ ॥ ૨॥

સર્વતઃ પાતુ મામત્ર કૈકેયીતોષવર્ધનઃ ।
શ્યામલાઙ્ગઃ શિરઃ પાતુ ભાલં શ્રીલક્ષ્મણાનુજઃ ॥ ૩॥

ભ્રુવોર્મધ્યે સદા પાતુ સુમુખોઽત્રાવનીતલે ।
શ્રુતકીર્તિપતિર્નેત્રે કપોલે પાતુ રાઘવઃ ॥ ૪॥

કર્ણૌ કુણ્ડલકર્ણોઽવ્યાત્ નાસાગ્રં નૃપવંશજઃ ।
મુખં મમ યુવા પાતુ વાણીં પાતુ સ્ફુટાક્ષરઃ ॥ ૫॥

જિહ્વાં સુબાહુતાતોઽવ્યાદ્યૂપકેતુપિતા દ્વિજાન્ ।
ચિબુકં રમ્યચિબુકઃ કણ્ઠં પાતુ સુભાષણઃ ॥ ૬॥

સ્કન્ધૌ પાતુ મહાતેજાઃ ભુજૌ રાઘવવાક્યકૃત્ ।
કરૌ મે કઙ્કણધરઃ પાતુ ખડ્ગી નખાન્ મમ ॥ ૭॥

કુક્ષિં રામપ્રિયઃ પાતુ પાતુ વક્ષો રઘૂત્તમઃ ।
પાર્શ્વે સુરાર્ચિતઃ પાતુ પાતુ પૃષ્ઠં વરાનનઃ ॥ ૮॥

જઠરં પાતુ રક્ષોઘ્નઃ પાતુ નાભિં સુલોચનઃ ।
કટિં ભરતમન્ત્રી મે ગુહ્યં શ્રીરામસેવકઃ ॥ ૯॥

રામાર્પિતમનાઃ પાતુ લિઙ્ગમૂરૂ સ્મિતાનનઃ ।
કોદણ્ડપાણિઃ પાત્વત્ર જાનુની મમ સર્વદા ॥ ૧૦॥

રામમિત્રઃ પાતુ ઝઙ્ઘે ગુલ્ફૌ પાતુ સુનૂપુરઃ ।
પાદૌ નૃપતિપૂજ્યોઽવ્યાચ્છ્રીમાન્ પાદાઙ્ગુલીર્મમ ॥ ૧૧॥

પાત્વઙ્ગાનિ સમસ્તાનિ હ્યુદારાઙ્ગઃ સદા મમ ।
રોમાણિ રમણીયોઽવ્યાદ્રાત્રૌ પાતુ સુધાર્મિકઃ ॥ ૧૨॥

દિવસે સત્યસન્ધોઽવ્યાદ્ભોજને શરસત્કરઃ ।
ગમને કલકણ્ઠોવ્યાત્સર્વદા લવણાન્તકઃ ॥ ૧૩॥

એવં શત્રુઘ્નકવચં મયા તે સમુદીરિતમ્ ।
યે પઠન્તિ નરાસ્ત્વેતત્તે નરાઃ સૌખ્યભાગિનઃ ॥ ૧૪॥

શત્રુઘ્નસ્ય વરં ચેદં કવચં મઙ્ગળપ્રદમ્ ।
પઠનીયં નરૈર્ભક્ત્યા પુત્રપૌત્રપ્રવર્ધનમ્ ॥ ૧૫॥

અસ્ય સ્તોત્રસ્ય પાઠેન યં યં કામં નરોઽર્થયેત્ ।
તં તં લભેન્નિશ્ચયેન સત્યમેતદ્વચો મમ ॥ ૧૬॥

પુત્રાર્થી પ્રાપ્નુયાત્ પુત્રં ધનાર્થી ધનમાપ્નુયાત્ ।
ઇચ્છાકામં તુ કામાર્થી પ્રાપ્નુયાત્પઠનાદિના ॥ ૧૭॥

કવચસ્યાસ્ય ભૂમ્યાં હિ શત્રુઘ્નસ્ય વિનિશ્ચયાત્ ।
તસ્માદેતત્સદા ભક્ત્યા પઠનીયં નરૈઃ શુભમ્ ॥ । ૧૮॥

આદૌ નરૈર્મારુતેશ્ચ પઠિત્વા કવચં શુભમ્ ।
તતઃ શત્રુઘ્નકવચં પઠનીયમિદં શુભમ્ ॥ ૧૯॥

પઠનીયં ભરતસ્ય કવચં પરમં તતઃ ।
તતઃ સૌમિત્રિકવચં પઠનીયં સદા નરૈઃ ॥ ૨૦॥

પઠનીયં તતઃ સીતાકવચં ભાગ્યવર્ધનમ્ ।
તતઃ શ્રીરામચન્દ્રસ્ય કવચં સર્વથોત્તમમ્ ॥ ૨૧॥

પઠનીયં નરૈર્ભક્ત્યા સર્વવાઞ્છિતદાયકમ્ ।
એવં ષટ્ કવચાન્યત્ર પઠનીયાનિ સર્વદા ॥ ૨૩॥

પઠનં ષટ્ કવચાનાં શ્રેષ્ઠં મોક્ષૈકસાધનમ્ ।
જ્ઞાત્વાઽત્ર માનવૈર્ભક્ત્યા કાર્યં યઃ પઠનં સદા ॥ ૨૪॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગતે શ્રીમદાનન્દરામાયણે
વાલ્મિકીયે મનોહરકાણ્ડે પઞ્ચદશસર્ગાન્તર્ગતં શ્રીશત્રુઘ્નકવચમ્ ॥

હનુમત્-લક્ષ્મણ-સીતા-રામ-ભરત-શત્રુઘ્ન
ષટ્ કવચાનિ પઠનીયમ્ ।
ષટ્ કવચાનિ પઠિતું અશક્તશ્ચેત્
હનુમત્-લક્ષ્મણ-સીતા-રામ –
અથવા હનુમત્-સીતા-રામ
અથવા હનુમત્-રામ / સીતા-રામ કવચાનિ ।
અથવા શ્રીરામકવચમેવ પઠનીયમ્ ॥

All the six kavachas
hanumat-lakShmaNa-sItA-rAma-bharata-shatrughna
from AnandarAmAyaNa should be recited together.
If one is unable to recite all the six,
then he/she can recite in the decreasing order
hanumat-lakShmaNa-sItA-rAma
hanumat-sItA-rAma

hanumat-rAma

sItA-rAma

If this is not possible, then one should at least

recite Shri Rama Kavacham.

Encoded by Antaratma antaratma at Safe-mail.net

Proofread by Antaratma, PSA Easwaran

---

*shatrughnakavacham*

pdf was typeset on January 30, 2021

Please send corrections to *sanskrit@cheerful.com*